# JAIN COLLEGE

463/465, 18th Main Road, SS Royal, 80 Feet Road, Rajarajeshwari Nagar,
Bangalore - 560 098

***Date: Dec 2017*** ***SUBJECT: Sanskrit***

***II PUC***
***Mock I***

***Timings Allowed: 3Hrs.*** ***Total Marks: 100***

**I. एकवाक्येन संस्कृतभाषया उत्तरं लिखत। 1x10=10**

१. अद्यापि देवाः कुत्र जन्म इच्छन्ति?
२. विक्रमादित्य कथां का कथयति?
३. प्रव्राजकः वणिजः गृहं किमर्थं अगच्छत्?
४. राणाप्रतापस्य पिता कः?
५. गौतमी का?
६. सुन्दरस्य पिता कः?
७. गुरोः उत्तमाङ्गं कर्णः कुत्र निवेशयति?
८. अर्थान् कथं चिन्तयेत्?
९.कृष्णशास्त्रीमहोदयस्य माता का?
१०. कः कर्णस्य रक्तं अपिबत्?

**II. द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत (पञ्चानामेव) 5x2=10**

११. नगरवासिभिः जनैः राक्षसः किं उक्तः?
१२. कन्याविषये परिव्राट् वणिजः सकाशे किं वदति?
१३. बिल्लाः राणाप्रतापं कथं सहाय्यम् अकुर्वन्?
१४. महाश्वेतायाः वपुषि यौवनं कथं पदं कृतम्?
१५. शान्तिः किमर्थं तरूणं दृष्टुं आगतवती?
१६. कर्णं प्रति परशुरामोपदेशं लिखत।
१७. नरविग्रहाः देवाः के?

**III. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नड-आङ्ग्लभाषया वा कुरूत (त्रयाणामेव) 3x3=9**

१८. विश्वस्य मातरस्सर्वाः सर्वाश्चैव महाफलाः।
तथा नद्यः स्वप्रकाशाः शतशो अथ सहस्रशः॥

१९. मञ्जूषां तां च गङ्गायां तथैवोर्ध्वस्थदीपिकाम्।
कृत्वा तत्याज निक्षिप्य घोरं वानरमन्तरे॥

२०. कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम्।
बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम्॥

२१. अस्त्रप्रयोगवेलायां यदा ते सूतभावना।
तदा सर्वाणि चास्त्राणि भवेयुर्निष्फलानि हि॥

२२. कामक्रोधौ तथा लोभं स्वादं शृङ्गारकौतुके।
अतिनिद्रातिसेवे च विद्यार्थी ह्यष्ट वर्जयेत्॥

**IV.पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत। (चतुर्णामेव) 4x2=8**

२३. सुखानि ते भर्तृकुलदेवताः वितरन्तु।
२४. कुत्रापि गत्वा धनं संग्रहिष्यामि।
२५. किमनेन प्रश्णायासेन?
२६. भवदनुग्रहं एव रक्षाकवचम्।
२७. परीक्षार्थं इतोपि समयावकाशः विद्यते।
२८. त्वं विश्वस्य आर्तिं परिहरसि।

**V. दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत। (पञ्चानामेव) 5x5=25**

**२९.** विक्रमादित्यस्य प्रभावेण राक्षसः कथं प्रवर्तितः?
३०. निर्विमर्शा हि भीरवः इति शीर्षिकां समर्थयत।
३१. दीर्घापाङ्ग प्रसङ्गः।
३२. रोटिकाप्रसङ्गः।
३३. तपोधनं युवानं दृष्ट्वा महाश्वेता किं अचिन्तयत्?
३४. सा शान्तिः।
३५. कर्ण-परशुरामयोः संवादः।
३६. विद्यार्थिणां कृते कृष्णशास्त्रिणां सन्देशः।

**VI.. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत। 4x1=4**

**३७**. विद्या ----- रक्ष्यते।
३८. ममापराधः ------ क्षन्तव्यः।
३९. तयोः अहमीदृशी---------- समुत्पन्ना।
४०. कष्टपरम्परायाः अपि ------ भवेत्।
(कृपया, योगेन, आत्मजा, सीमा)

**VII. ४१. संयोजयत 4x1=4**

| अ | आ |
|---|---|
| १. परिव्राट् | १. ब्रह्म |
| २. प्रजापतिः | २. सरस्वत्याः |
| ३. विषयः | ३. कामवशगः |
| ४. विलासमिव | ४. प्रेरयतीन्द्रियम् |

**VIII. रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरूत (त्रयाणामेव) 3x1=3**

**४२**. <u>चिन्तातुराणां</u> न सुखं न निद्रा।
४३. कन्या <u>मञ्जूषायां</u> प्रवेशिता।

४४. कालिदासस्य <u>सप्त</u> कृतयः।

४५. वैदेशिकाः <u>वाणिज्यार्थं</u> आगच्छन्ति स्म।

४६. <u>विमर्श**केन**</u> कृतीनाम् अध्ययनं सम्यक् कर्तव्यम्।

**IX. यथानिर्देशं कुरूत (चतुर्णामेव)** **4x3=12**

**४७**. सन्धिं विभजयत\योजयत (त्रयाणमेव)

अद्यापि, सम्भवतीव, भोजन+अनन्तरम्, तत्+विरूद्धम्, ततः+ततः

**४८. विग्रहवाक्यं\समस्तपदं लिखत (त्रयाणामेव)**

वस्त्रापणः, कामक्रोधौ, ज्ञानदाहः, जीवानां मरणं, हिमवतः दक्षिण।

**४९. लिङ्ग-विभक्ति-वचनानि लिखत (द्वयोरेव)**

विद्या, पादयोः, भगवति, मुनिः

**५०. लकार-पुरूष-वचनानि लिखत (द्वयोरेव)**

त्यजति, विद्यते,चिन्तयत, भवन्तु

**५१. पदपरिचयं कुरूत (त्रयाणामेव)**

**पतित्वा, त्यक्तवान्, भवितुम्,परिहृत्य, स्नातुम्**

**५२. प्रयोगं परिवर्तयत।**

**अहम् एतद् धनं स्वीकर्तुं न इच्छामि।**

**अथवा**

**वित्तेन धर्मः रक्ष्यते।**

**५३. अलङ्कारं सलक्षणं निर्दिशत।**

तमभ्यधावत् स्वकृतो मूर्तिमानिव दुर्नयः।

**अथवा**

अज्ञातहृदयेष्येवं वैरी भवति सौहृदयम् ।

**५४. कन्नडभाषया-आङ्लभाषया वा अनुवदत।** **5**

सङ्गणकस्य निर्देशनं प्रदातुं का भाषा नितराम् उपयुक्ता इति बहवः प्रयोगाः कृताः। विश्वस्य सकलाः भाषाः तत् प्रयोगे निवेशिताः। विश्वस्य भाषासु संस्कृतमेव अधिकं वैज्ञानिकं वर्तते। अतः सङ्गणकस्य कृते संस्कृत एव श्रेष्ठभाषा भवितुं अर्हतीति अद्य प्रयोगैः प्रमाणितम्

**५५. संस्कृतभाषया अनुवदत।** **5**

ಒಮ್ಮೆ ವಿಶ್ವಾಮಿತ್ರ ಮಹರ್ಷಿಗಳು ದಶರಥ ಮಹಾರಾಜನ ಆಸ್ಥಾನಕ್ಕೆ ಬಂದರು. ಯಜ್ಞರಕ್ಷಣೆಗಾಗಿ ಬಾಲಕರಾದ ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ತಮ್ಮ ಜೊತೆ ಕಳುಹಿಸುವಂತೆ ಕೇಳಿಕೊಂಡರು. ಪುತ್ರವಾತ್ಸಲ್ಯದಿಂದ ದಶರಥನು ದುಃಖಿತನಾದನು. ಕುಲಪುರೋಹಿತರಾದ ವಸಿಷ್ಠರು ವಿಶ್ವಾಮಿತ್ರರ ಬೇಡಿಕೆಯನ್ನು ಪೂರೈಸುವಂತೆ ದಶರಥನಿಗೆ ನುಡಿದರು. ಲೋಕಕಲ್ಯಾಣಕ್ಕಾಗಿ ದಶರಥನು ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ಕಳುಹಿಸಿದನು.

**Once the sage Vishwamitra came to the court of the king Dasharatha. He requested to send the boys Rama and Lakshmana to protect his sacrifice. Dasharatha felt sad due to affection towards his children. Vasistha, the preceptor of the family, advised Dasharatha to fulfill Vishwamitras request. Dasaratha sent Rama and Lakshmana for the welfare of the world.**

**५६. इदं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **5x1=5**

सागरे सर्वाणि तीर्थानि सन्ति इति तं पवित्रं मन्यन्ते भारतीयाः। पृथिव्याः मेखला इति कवयः समुद्रं वर्णयन्ति। अस्य जलं क्षारं भवतीति जनाः तन्न पिबन्ति। वर्षाकाले सागरस्य जले प्रबलेन वातेन तुङ्गाः तरङ्गा उद्भवन्ति, घोरः गर्जनारवः च उत्पद्यते। सागरे बहुविधाः सत्त्वाः निवसन्ति मत्स्याः कूर्माः मकराश्च। तस्य तले बहुमूल्यानि रत्नानि मौक्तिकानि च तिष्ठन्ति इति कारणात् जनाः तं रत्नाकरः इति कथयन्ति। समुद्रतीरे सामान्यतः शुद्धः प्रशान्तः च पवनः वहति। अतः तत्र जनाः प्रातःकाले सायङ्काले च विहारार्थं सञ्चरन्ति। बालाश्च वालुकासु क्रीडन्ति। एवं सर्वे आनन्दमनुभवन्ति।

**प्रश्नाः**

**१.** भारतीयाः सागरं किमर्थं पवित्रं मन्यन्ते?
२. वर्षाकाले सागरः कीदृशः भवति?
३. सागरे के निवसन्ति?
४. सागरतले कानि तिष्ठन्ति?
५. समुद्रतीरे जनाः कदा सञ्चरन्ति?

**अथवा**

पुस्तकप्रेषणार्थं पुस्तकप्रकाशनं प्रति पत्रं लिखत।

*******************************